२। दक्षिण-पूर्व एशियामहादेशे पञ्चतन्त्रस्य प्रभावः वर्णनीयः।

महाकविना विष्णुशर्मणा विरचितं गल्पसाहित्यं पञ्चतन्त्रम्। तन्त्रपञ्चकैः रचितत्वात् काव्यमिदं पञ्चतन्त्रम् इति ख्यातम्।

*सकलार्थशास्त्रसारं समालोक्य विष्णुशर्मापि।*
*तन्त्रैः पञ्चभिरेतच्चकार सुमोहरं शास्त्रम्।।*

मित्रभेद-मित्रप्राप्ति-लब्धप्रणाश-काकोलूकीय— अपरीक्षितकारकम् इति तन्त्रपञ्चकं तत्र समुपलभ्यते। संस्कृत साहित्ये पञ्चतन्त्रं रत्नभाण्डाररूपेण विरचितम्। आसमुद्रहिमाचले भारतवर्षे पञ्चतन्त्रस्य अविस्मरणीयः प्रभावः परिलक्ष्यते। यथा भारतवर्षे तथा बहिर्भारते अपि पञ्चतन्त्रं सममेव जनप्रियम्।

वर्तमानविश्वस्य पञ्चाशत् देशेषु द्विशताधिकेषु संस्करणेषु पञ्चतन्त्रकथा उपलब्धा। इथिओपियादेशात् ग्रीसपर्यन्तम्, मरोक्कादेशात् लाउसपर्यन्तं बहुषु देशेषु स्थानीयसाहित्य-संस्कृतिना सह पञ्चतन्त्रस्य काहिनी मिश्रिता जाता।

विश्वे सर्वसाकुल्ये सप्तसंख्यका महादेशाः सन्ति। तेषु च महादेशेषु एशियामहादेशः यथा अन्यतमः तथा बृहत्तमः। अस्य च एशियामहादेशस्य दक्षिण-पूर्वभागे अवस्थिताः देशाः दक्षिण-पूर्व एशीयदेशरूपेण परिचिताः। तें यथा भारत-इन्दोनेशिया-मायानमार-थाइल्याण्ड-लाउस-कम्बोडिया-भियेत्नाम-व्रुनेइ-सिङ्गापुर-चीन प्रभृतयः देशाः।

विष्णुशर्मणः पञ्चतन्त्रं भारतभूखण्डमतिक्रम्य एशियामहादेशस्य

विविधेषु देशेषु प्रचारितमासीत्। दक्षिण–पूर्वएशियामहादेशस्य विभिन्नाः देशाः व्यवसा–वाणिज्यसूत्रेण परस्परं संबद्धाः आसन्। भौगोलिकावस्थानस्य आनुकूल्यात् स्थलपथेन जलपथेन च एतेषां मध्ये वाणिज्यसम्पर्कं वर्तमानमासीत्।

अस्मिन् परिमण्डले भारतवर्षः साहित्य–संस्कृतिसमृद्धः सुप्राचीनः देशः। भारतीयाः वणिजः वाणिज्यार्थं तेषु देशेषु अवस्थानकाले अवसरविनोदनार्थं रामायण–महाभारतस्य काहिनीनां, जातकगल्पानां, पञ्चतन्त्र कथानां चर्चां कृतवन्तः। अनुरूपभावेन वैदेशिकाः वणिजः भारतमागम्य भारतीय साहित्य–संस्कृतिना सह परिचिताः जाताः। इत्थं च भारतीयसाहित्यस्य प्रवासयात्रा सुगमा जाता। परन्तु बौद्धसन्न्यासीनां हिन्दुपण्डितानां विदेशेषु पर्यटनमाध्यमेन अपि संश्लिष्टदेशेषु संस्कृतसाहित्यस्य प्रसारः सूचितः अभवत्।

अवसरविनोदार्थं गल्पसाहित्यस्य भूमिका अतीव गुरुत्वपूर्णा। विशेषतः पञ्चतन्त्रस्य गल्पानां जनचित्तहरणक्षमता दुर्वारा। मनुष्यचरित्रेण सह पशुपक्षीणां चरित्राणां सम्मेलनात् पञ्चतन्त्रकथा सर्वेषु पाठकेषु श्रोतृवर्गेषु च सममेव आकर्षणीया आसीत्।

दक्षिण–पूर्व एशियामहादेशेस्य जाभाद्वीपपुञ्जे पञ्चतन्त्रकथायाः समधिकः प्रभावः परिलक्ष्यते। तत्र पञ्चतन्त्रकथा 'तन्त्रीकामन्दकम्' इति नाम्ना परिचितम्। ख्रीष्टिये १०३१ अव्दे जाभाद्वीपे तन्त्रीकामन्दकम् रचितमभवत्। तत्र तन्त्रीकामन्दकम् 'तन्त्रीचरितम्', तन्त्रवाक्यम्' 'चण्डपिङ्गलः' इति नाम्नापि अभिधीयते। १९३१ ख्रीष्टाव्दे अध्यापकः सि हुयकासमहाभागः तन्त्रीकामन्दकस्य युगपत् आङ्गलभाषायां जार्मानभाषायां च अनूदितवान्।

लाउस, दक्षिण–पूर्व एशिया महादेशस्य अन्यतमः द्वीपराष्ट्रः। फरासी शासनाधीने लाउस देशे पञ्चतन्त्रस्य फरासीभाषायाम् अनुवादः प्रचलितः आसीत्। फरासीशासनस्य पूर्वं लाउससम्राजः फटिसारथस्य



तथा लानाराजत्साइशततीर्थस्य शासनकाले जातकसाहित्येन सह पञ्चतन्त्रस्यापि अनुवादः अभवत्। मूलतः बौद्धश्रमणभिक्षुभिः पञ्चतन्त्रस्य काहिनी लाउसदेशे प्रचारिता। लाउसदेशे पह्लवी भाषायाम् अनूदितस्य पञ्चतन्त्रस्य 'कलिल या डिमना' तथा 'कलिलक-दमनक' इत्यस्य प्रभावः अपि परिलक्षितः भवति। लाउसदेशे 'नन्दक प्रकरण' नाम्ना पञ्चतन्त्रस्य स्वतन्त्रसस्करणमेकमपि प्राप्यते।

बौद्धधर्मप्रभावितः थाइल्याण्डदेशोऽपि दक्षिण–पूर्व एशियामहादेशस्य प्रसिद्धः देशः। तस्मिन् देशे बौद्धश्रमणादिभिः जातकसाहित्येन सह पञ्चतन्त्रकथा तत्र आनीता। तत्र पञ्चतन्त्रं जातकसाहित्येन प्रभावितमभवत्। थाइल्याण्डदेशस्य बौद्धविहारेषु मन्दिरगात्रेषु च पञ्चतन्त्रस्य गल्पानां काहिनीचित्राणि मुद्रितानि दृश्यन्ते।

कम्बोडियादेशेऽपि पञ्चतन्त्रम् अतीव जनप्रियसाहित्यरूपेण विवेचितम्। पञ्चतन्त्रस्य मलय संस्करणं हिकायेत् कलिल ड्यान दमिन (Hikayat Kalila dan damina) कम्बोडियादेशे अतिपरिचितम्। आरववणिग्भिः 'कलिल ड्यान दमिन' कम्बोडियायाम् आनीतम्। तेन च देशेन सह भारतवर्षस्य वाणिज्यकसम्पर्कं सुप्राचीनकालात् प्रचलितम् आसीत्। पञ्चतन्त्रस्य मलयसंस्करणं 'कलिल ड्यान दमिन' इति ग्रन्थेन सह जातकगल्पानां सादृश्यं परिलक्ष्यते।

दक्षिण–पूर्व एशियामहादेशस्य इन्दोनेशियादेशेऽपि पञ्चतन्त्रं सुपरिचितम्। उल्लेख्यं यत् इन्दोनेशिया भारतीय पौराणिकसाहित्येषु यवद्वीपरूपेण वर्णितः।

इन्दोनेशियादेशस्य 'पञ्जी' साहित्यं यथा सुप्राचीनं तथा लोकप्रियम्। पञ्जीसाहित्यस्य अन्तर्गतं 'तन्त्री' नामकं साहित्यं पञ्चतन्त्रेणसंबद्धम्। तस्मिन् च देशे सुप्रसिद्धं वोरोवुदोरमन्दिरं, 'प्रम्वाननमन्दिरं' सुप्रसिद्धं हिन्दुतीर्थम्। तत्रस्थितेषु मन्दिरगात्रेषु

जातकगल्पैः सह पञ्चतन्त्रकाहिनी अपि उत्कीर्णा दृश्यते। इसलामीकरणस्य पूर्वं खीष्टिये एकादशशतके राजा ऐरलिङ्गः भारतवर्षात् बहून् शास्त्रज्ञपण्डितान् शास्त्रग्रन्थान् च तत्र आनीतवान्।

एतद्व्यतीतं दक्षिण-पूर्व एशियामहादेशस्य अन्येषु बहुषु देशेषु अपि पञ्चतन्त्रस्य सगर्वं उपस्थितिः परिलक्षिता भवति।

একাদশশতকে রাজা এরালঙ্গঃ ... অত্র আনীতবান্।

এতদ্ব্যতীতং দক্ষিণ-পূর্ব এশিয়ামহাদেশস্য অন্যেষু বহুষু দেশেষু অপি পঞ্চতন্ত্রস্য সগর্বং উপস্থিতিঃ পরিলক্ষিতা ভবতি।

**३। शुकसप्ततिकथा कीदृशं साहित्यम् केन च विरचितम्? शुकसप्ततिकथायाः कियत् संस्करणं प्राप्यते? बहिर्भारते शुकसप्ततिकथायाः अनुवादः प्रभावश्च वर्णनीयः।**

शुकसप्ततिकथा गल्पसाहित्यस्य अन्तर्गतम्। कथा-आख्यायिका-खम्डकथा-परिकथा-कथालिका इति पञ्चविधेषु गद्यकाव्येषु खण्डकथा नामकस्य गद्यकाव्यस्य अन्तर्गतम् हि शुकसप्ततिकथासाहित्यम्।

शुकसप्ततिकथा कविना चिन्तामणिभट्टेन रचितमिति अनुमीयते।

शुकसप्ततिकथायाः मुख्यतः त्रिविधं संस्करणं प्राप्यते। (१) चिन्तामणि भट्टस्य शुकसप्ततिकाव्यम्। (२) जैनकवेः पूर्णभद्रस्य जैनसंस्करणम्। (३) देवदत्तनामकस्य कस्यचित् कवेः संक्षिप्तसंस्करणम्।

संस्कृतभाषया रचितं शुकसप्ततिकाव्यम्। भारतीय विविधासु प्रादेशिकभाषासु यथा शुकसप्ततिकथा अनूदिता तथा बर्हिभारतीय भाषासु अपि।

शुकसप्ततिकाव्यस्य वक्ता कश्चित् शुकपक्षी। देवदासनामकस्य कस्यचित् राजपुरुषस्य पत्नी पत्युः अनुपस्थितौ यदा उपपतिना सह मिलितुं गृहत्यागे उद्योक्ता तदा देवदासस्य पालितेन शुकपक्षिणा सा प्रतिरोध्या जाता। शुकपक्षी नारीजीवनस्य पवित्रतां व्याख्याय तस्यै काञ्चित् उपदेशान् प्रदत्तवान्। एवंविधानां सप्ततिसंख्यकानां उपदेशसमन्वितगल्पानां सङ्कलनं हि शुकसप्ततिकथाकाव्यम्।

रम्यरचनारूपेण शुकसप्ततिकथा पाठकेषु आकर्षणीयम् आसीत्। फलतः तच्च काव्यं वैदेशिकभाषासु अपि अनूदितम्। शुकसप्ततिकथा प्रथमतया मध्यप्राच्यस्य पारसीक भाषायाम् अनूदिता अभवत्। खीष्टिये चतुर्दशशतके कादि हासान नामकेन केनचित् विदुषा मलय भाषायां शुकसप्ततिकथा अनूदिता जाता। स च अनुवादग्रन्थः 'हिकायेत वायाण वुदिमान' नाम्ना अभिहितः आसीत्। तस्य च अनुवादकर्मणः समयकालः आसीत् ७७३ हिजरी अब्दः तथा खीष्टियः १३७१ अब्दः। ततपरम् इन्दोनेशीयभाषायामपि शुकसप्ततिकथा अनूदिता।

खीष्टिये चतुर्दशशतके जिया-आल-दीन नक्सवीनामकः कश्चित् तुर्कीकविः शुकसप्ततिकथायाः तुर्कीभाषायाम् अनुवादं कृतवान्। स च अनुवादः 'तुतिनामा' इत्यभिहितः अभवत्। पारसीक भाषायां 'तुति' शब्दस्य अर्थः 'शुक', 'नामा' शब्दस्य अर्थः 'काहिनी'। नक्सवीकविना अनूदिते 'तुतिनामा' ग्रन्थे द्विपञ्चाशत् संख्यकाः गल्पाः संयुक्ताः आसन्।

तुतिनामग्रन्थेन मोगल सम्राट् आकवरमहाभागः समधिकः प्रभावितः आसीत्। तस्य राजधान्यां बहुनि तैलचित्राणि, प्राचीरचित्राणि च तुतिनामानुसारं अङ्कितानि अभवन्। द्वौ इराणीयशिल्पिनौ मीर-सैयद-आल तथा आव्दुस सामाद च तानि चित्राणि रचितवन्तौ।

तुतिनामाकाव्यग्रन्थः परवर्त्तीकाले जार्मानभाषायाम् अनूदितः। १८२२ खीष्टाव्दे तुतिनामा ग्रन्थस्य जार्मानभाषायाम् अनुवादः कार्ल एल. आइकेन (Carl L. Iken) महोदयेन कृतः। तत्पूर्वं १८०१ खीष्टाव्दे फ्रान्सिस ग्ल्याडउइनमहोदय (Franc's Gladwin) तुतिनामाग्रन्थस्य आङ्गलभाषायाम् अनुवादं कृतवान्।

विख्यातः भारतीयः कूटनीतिविद् तथा विशिष्टः शिक्षाविद् आदित्यनारायण धैर्यशील ह्याकसारमहोदयः बहूनां संस्कृतग्रन्थानाम् आङ्गलानुवादं कृतवान्। एलाहावाद विश्वविद्यालयस्य, अक्सफोर्ड विश्वविद्यालयस्य कृती छात्रः गवेषकश्च आदित्यनारायणः बहुषु राष्ट्रेषु

राष्ट्रदूतपदे वृतः आसीत्। तेन च आदित्यनारायणेन खीष्टिये २००० अब्दे शुकसप्ततिकथायाः आङ्गलभाषायाम् अनुवादः कृतः।

प्रादेशिकभाषासु अपि शुकसप्ततिकथायाः बहवः अनुवादः प्रकाशिताः। तेषु अनुवादेषु वङ्गभाषायाम् अनूदिता चण्डीचरणमुन्सीमहाभागस्य शुकसप्ततिकथा, रमाकान्त त्रिपाठी महाभागस्य शुकसप्ततिकथायाः हिन्दीभाषायाम् अनुवादः अन्यतमः।

उल्लेख्यं यत् दक्षिणभारतीय सुप्राचीना नृत्यशैली 'कथाकलिः'। अनया नृत्यशैल्याऽपि शुकसप्ततिकथायाः नृत्यायनं भवति।

of Calcutta' ইত্যস্যাঃ সদস্যঃ অপি আসীৎ।

উইলসনমহোদয়স্য সুমহতী কীর্তিঃ সম্পূর্ণ ঋগ্বেদস্য আঙ্গলানুবাদঃ। তেন মহাকবেঃ কালিদাসস্য মেঘদূতম্ আঙ্গলভাষায়াম্ অনূদিতম্। সংস্কৃত-আঙ্গলাভিধানমপি অপি তস্য অন্যা অবিস্মরণীয়া কীর্ত্তিঃ।

## রচনাধর্মী প্রশ্নোত্তর

१. महाकवेः कालिदासस्य अभिज्ञान शकुन्तलायाः विश्वविजयाभियानं वर्णनीयम्।

वर्तमानमानवसभ्यतायाः गर्भगृहरूपेण भारतवर्षं समग्रे विश्वे यथा नन्दितं तथा वन्दितम्। 'तमसः परस्तात्' ज्योतिर्मयम् आत्मज्ञानं लब्धा अस्माकं पूर्वजाः ऋषयः विश्ववासिमन् आहूय अवदन्— 'शृण्वन्तु विश्वे अमृतस्य पुत्रा......' इति।

'वसुधैव कुटुम्बकम्' इति भावनया उद्दीप्तायाः तस्याः भारतीयसभ्यतायाः मुखपात्रः महाकविः कालिदासः। विश्वसाहित्यस्य अपारः विस्मयः कालिदासः वाण्याः वरपुत्ररूपेण स्थितः। नवरसरुचिराप्रतिभायाः माधुर्यबलात् अपारः विस्मयः कालिदासः जगति असाधारण कविरूपेण स्वीकृतः।

कालिदासप्रतिभायाः माधुर्येण, सौकुमारत्वेन यथा भारतवर्षं तथा पाश्चात्यजगदपि मोहितम्। विश्ववन्दितेन अनेन महाकविना रचितानि साहित्यानि यथा—ऋतुसंहारः, मेघदूतमिति खण्डकाव्यद्वयम्, कुमारसम्भवम्-रघुवंशमिति महाकाव्यद्वयम्, तथा च मालविकाग्निमित्रम्, विक्रमोर्वशीयम्, अभिज्ञानशकुन्तलमिति दृश्यकाव्यम् सन्ति।

कालिदासकृतिषु अभिज्ञानशकुन्तलम् इति नाटकम् यथा अनन्यं तथा असाधारणम्। महाभारतीय कथामाश्रित्य रचिते अस्मिन् नाटके कविप्रतिभायाः सार्विकस्फुरणं जातम्। अभिज्ञानशकुन्तलेन यथा स्वदेशस्य पाठकचित्तं जितं तथा पाश्चात्य जगतः अपि।



अभिज्ञानशकुनतलस्य प्रवासयात्रा कलिकातायाः 'एशियाटिकसोसाइटि' नामिकायाः प्राच्यविद्यासंस्थायाः सचिवमहोदयेन स्यार उइलियमजोन्समहाभागेन सूचिता। जोन्समहाभागः १७८९ खीष्टाब्दे महाकविकालिसासस्य अभिज्ञानशकुन्तलायाः आङ्गलानुवादं कृतवान्। तथा च १७९१ खीष्टाब्दे तस्य च नाटकस्य जार्मानभाषायामपि अनुवादः प्रकाशितः अभवत्। स्यारजोन्सकृतः शाकुन्तलस्य अनुवादः 'Shakuntala or The Fatal Ring' इति नाम्ना प्रकाशितः जातः।

अभिज्ञानशकुन्तलस्य अनेन युग्मानुवादेन पाश्चात्यजगत् कालिदासस्य नाट्यप्रतिभया नितरां मुग्धाः विस्मिताः च जाताः। शकुन्तलानाटकस्य आङ्गिक—वाचिक-आहार्यसौन्दर्येन ते अभिभूताः अभवन्। स्यार जोन्समहोदयः तदीयानुवादस्य एका प्रतिलिपिः विशिष्ट जार्माननाट्यकाराय कवये प्रख्यातभारततात्त्विकाय जोहान् ओलफ् ग्यां भन ग्येटेमहोदयाय प्रदत्तवान्। ग्येटेमहोदयः शाकुन्तलस्य नाट्यसौन्दर्येन मुग्धः सन अविस्मरणीयमेकं मूल्यायणं कृतवान्। तस्य च मूल्यायणस्य संस्कृतानुवादः पण्डित-ताराकुमारकविरत्नेन कृतः। यथा—

वासन्तं कुसुमं फलञ्च युगपद् ग्रीष्मस्य सर्वं च तत्।
यत्किञ्चिन्मनसो रसायनमहो सन्तर्पणं मोहनम्।
एकीभूतमपूर्वमथवा स्वर्लोकभूलोकयोः
ऐश्वर्यं यदि कोऽपि काङ्क्षति तदा शाकुन्तलं सेव्यताम्।।

स्यार उइलियामजोन्समहोदयस्य शकुन्तलानाटकस्य आङ्गलानुवादः इउरोपमहादेशस्य इंल्याण्ड, जार्मानि, फ्रान्स, डेनमार्क, इतालि प्रभृतिषु देशेषु प्रचारितः प्रसारितश्च जातः। आमेरिकादेशेऽपि तस्य च अनुवादस्य प्रचारोऽभवत्। संस्कृतसाहित्यस्य अस्य अमूल्यरत्नस्य प्रभावेन यथा संस्कृतसाहित्यं तथा भारतवर्षं

पाश्चात्यवासीनाम् आकर्षणस्य केन्द्रविन्दुरूपेण प्रतिष्ठितं जातम्। फलस्वरूपं केवलमात्रं इंल्याण्डदेशे एव १७९३ खीष्टाब्दतः १८०७ खीष्टाब्दमध्ये अभिज्ञानशकुन्तलस्य संस्करणपञ्चकम् तथा समग्रे इउरोपमहादेशे द्वादशभाषासु षट्चत्वारिंशत् संस्करणं प्रकाशितं जातम्।

जोन्समहोदयस्य अनुवादकर्मणा फ्रान्सदेशस्य पण्डिताः शकुन्तलानाटकस्य रसास्वादम् अनुभूय आप्लुताः जाताः। जिन ज्याक एम्पायार नामकः कश्चित् फरासी पदार्थविज्ञानी तेन च आप्लुतः सन् अवदत्—'Indian thought would introduce another Renaissance in his own time'। अल्पोन्स डिला मार्टिनमहोदयेन अतःपरं शकुन्तलानाटकं फरासीभाषायाम् अनूदितम्। प्रख्यातः फरासीपण्डितः लुहस् रेनो, पाश्चात्य रोमान्टिकयुगस्य प्रतिनिधिस्थानीयाः कवित्रयः ला मार्टिन, आलफ्रेड भिक्टर डि भिगनि, भिक्टर हुगो प्रमुखाः शकुन्तलानाटकस्य आङ्गलानुवादेन नितरां प्रभाविताः जाताः। ला मार्टिनमहाभागः मन्यते यत् — 'एकस्मिन् शकुन्तलानाटके एव विश्वस्य प्रतिनिधिस्थानीयानां होमार–थिउक्लिटास—ट्यासो इति कवित्रयाणां काव्यभावनायाः प्रयागसङ्गमः जातः'। स्यार जोन्समहोदयेन नाट्यकारः कालिदासः प्राच्यदेशस्य 'शेक्सपीयार'रूपेण अभिहितः।

विख्यातः फरासी कविः ब्रूगेइर डे सोरसाममहोदयः खीष्टिये १८०६ शतके शकुन्तलानाटकं फरासीभाषायाम् अनूदितवान्। संस्कृतभाषायां सुपण्डितः प्रख्यातः फ्रान्सकविः अयन्टिनिओ लिओनार्द डे चेजिमहोदयः अपि अभिज्ञानशकुन्तलायाः जार्मानभाषायाम् अनुवादं कृतवान्। १८३० खीष्टाब्दे चेजिमहोदयस्य अनुवादः प्रकाशितः अभवत्। शकुन्तलानाटकस्य रसमाधुर्येन मुग्धः चेजिमहोदयः अवदत्— 'I shall never forget the impression of it made on me'। शकुन्तलानाटकं प्रशस्य जार्माननाट्यकारः ग्येटे

चेजिमहोदयं पत्रयोगेन अवदत् —'Shakuntala was a star that makes the night more agreeable than the day'।

जार्मानदेशेऽपि शकुन्तलानाटकस्य प्रभूतः समादरः दृश्यते। गयेटेमहोदयेन शकुन्तलानाटकस्य प्रस्तावना तस्य नाटके प्रयुक्ता। जार्मानकविः जर्ज फर्सस्टारमहाभागः शकुन्तलानाटकस्य जार्मानभाषायाम् अनुवादं कृतवान्। शाकुन्तलानाटकस्य अनुवादेन जार्मानवासिनः प्रोत्साहिताः सन्तः भारततत्त्वविषये आग्रहिनः अभवन्। जार्मानदेशस्य जेना–ओयेइमार–हेइडेलवार्ग–वन–वार्लिन–टुविनगेन विश्वविद्यालयेषु तस्मादेव प्राच्योविद्यागवेषणया प्रचलिता जाता। भारतीय प्रज्ञया सह परिचयात् जार्मानपण्डितैः उपलब्धं यत् नाटतत्त्वविषये ग्रीकतत्त्वात् भारतीयतत्त्वं कथमपि न न्यूनम्—'The Greek model was not the absolute model in art'.

परवर्त्तीकाले फ्रेडरिक रुवार्ट, हेइनरिच हेइन प्रमुखाः बहवः जार्मानपण्डिताः अभिज्ञानशकुन्तलस्य अनुवादं कृतवन्तः।